CC0. In Public Domain. Muthulakshmi Research Academy

ஆர்யா சதகம்

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

Sri Vedachalam Sastri Collection, Karaikudi

D. D. B. S. University Serial No. 6

CC0. In Public Domain. Muthulakshmi Research Academy

॥ मूकपंचशती–आर्याशतकम् ॥



Published by : ***G. K. DIXIT***

FOUNDER.

DRAVIDA DESA BRAHMANA SAMSKRIT UNIVERSITY,

PUTHUR, TRICHY - 620 017.

1989] [Rs. 2-00

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy



श्री काञ्चिकामाक्षी

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

முன்னுரை

ஸ்ரீ காஞ்சீபுரத்தை பூமண்டலத்தின் நாபிஸ்தானம் என்று சொல்லுவார்கள். பூமண்டலத்தில் 64 பீடஸ்தானங்கள் உண்டு என்றும் அவைகளுக்குள் ஸ்ரீ காஞ்சியில் காமகோடி பீடஸ்தானம் தலைசிறந்தது என்றும் இங்கு ஸ்ரீ காமாக்ஷி அம்பாள் காமகோடி பீடத்தில் வீற்றிருந்து பூமண்டலத்தை அரசாக்ஷிபுரிகிருள் என்றும் பெரியோர்கள் சொல்லுவார்கள். ஸ்ரீ காமாக்ஷிதேவியின் அருள் பெற்று விளங்கிய கவிகளுக்குள் ஸ்ரீ "மூககவி" என்பவர் தலைசிறந்தவர், மிகவும் பிரசித்தி பெற்றவர். மூகர் என்ருல் ஊமை பேசும் திறமையே இவருக்கு இல்லை என்று பொருள் – கவி என்ருல் நல் வாக்சக்தி பெற்று கல்பனைகள் செய்து கவிதை பாடுபவர் என்பது பொருள்.

ஒன்ருேடு ஒன்று சேர்ந்து இருக்கமுடியாத பொருள் கொண்டதாக இவர் பெயர் அமைகிறது. ஆனல் முதலில் இவர் சிறிதுகாலம் ஊமையாக இருந்து, பின்னர் ஸ்ரீ காமாக்ஷி அம்பாளின், அனுக்ரஹத்தினுல் கவியாகத் திகழ்ந்தார் என்பதை உலகிற்கு தெரிவிக்கவே இவர் பெயர் இவ்விதம் பரவிற்று என்றும் கூறமுடிகிறது. முன்னர் ஒரு சமயம் இவர் ஊமையாகவே இருந்து அம்பாள் ஸன்னதியில் தவம் கிடந்து கொண்டிருந்தபோது ஸ்ரீ காமாக்ஷி அம்பாள் இவர்பால் கருணைகொண்டு தாம்பூல ரஸத்தை இவருடைய வாயில் உமிழ்ந்து, அதன் பின்னர் இவர் பெரியதொரு கவியாகி 500 சுலோகங்கள் கொண்ட பஞ்சசதி ஸ்தோத்ரத்தை அன்னையின் எதிரில் வாயாரப்பாடிப் புகழ்ந்தார் என்றம் அந்த 500 சுலோகங்களுக்கு மூகபஞ்சசதி என்று பெயர் ஏற்பட்டது என்றும் சொல்லுவார்கள். இவருக்கு ஏற்பட்ட கவித்திறனைப்பற்றி நீலகண்டதீக்ஷிதர் ஒரு இடத்தில்

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

स्तन्येन कश्चित् कवयां बभूव, तांबूलसारेणपरो जनन्याः

என்று கூறியிருக்கிறார். இந்த கவி செய்த 500 சுலோகங்களை ஐந்து சதகங்களாக பிரித்து புகழ்ந்து பாடியிருக்கிறார். ஆர்யாசதகம், பாதாரவிந்தசதகம், ஸ்துதிசதகம், கடாக்ஷசதகம், மந்தஸ்மிதசதகம், என்று இந்த 5க்கும் பெயர். இந்த நூலிற்கு மூகபஞ்சசதி என்றுபெயர் ஏற்பட்டது. இவற்றின் ஆர்யாசதகம் என்று பெயருள்ள முதல் சதகத்தை இந்த நிறுவனம் கொட்டை எழுத்தில் அச்சிட்டு முதலில் வெளியிடுகிறது. இதனை பாராயணம் செய்பவர்கள் யாவருக்கும் குறிப்பாக மாணவர்களுக்கும் நல்ல வாக்சக்தியும் இனிய பேச்சுத்திறமையையும் நல்ல புத்தி சக்தியுடன் கூடிய படிப்பின்மேன்மையும் ஏற்படும் என்று ஆர்யாசதகத்தில் கடைசி சுலோகத்தில் பலச்ருதி சொல்லி முடிக்கிறார். மூககவியானவர் உனக்கு ஏற்பட்ட திறமைக்கு அம்பாளின் அனுக்ரஹமே காரணம் என்பதை ஸ்துதி சதகத்தில் கூறுகிறார்.

मूकानामपिकुर्वती सुरघुनी नीकाशवाग्वैभवम् என்று விஸ்தாரமாக கூறியிருக்கிறார்.

இந்த ஆர்யாசதகத்தை, பாலர்கள் பாவையர்கள் முதியோர்கள் யாவரும் எளிதில் பாராயணம் செய்து கல்வியின் மேன்மையையும் சிறந்த அறிவையும் அன்னையின் கடாக்ஷத்தையும் அடையவேண்டும் என்ற பரந்த எண்ணங்கொண்டு இந்த நிறுவனம் கொட்டை எழுத்துக்களில் அச்சிட்டு வெளியிடுகிறது. இதனை எல்லோரும் பாராயணம் செய்து சிறந்த பலன்களை அடைந்து அன்னையின் அனுக்ரஹத்துக்கு பாத்ரமாகி இன்பமாக வாழவேண்டும் என்று வேண்டிக்கொள்கிறேன்

Dr. N. S. யக்ஞேஸ்வர சாஸ்திரிகள்

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

॥ श्रीः ॥

मूकपञ्चशती — आर्याशतकम्

कारणपरचिद्रूपा कांचीपुरसीम्नि कामपीठगता ।
काचन विहरति करुणा काश्मीरस्तबककोमलांगलता ॥

कंचन कांचीतिलकं करधृतकोदण्डबाणसृणिपाशम् ।
कठिनस्तनभरनम्रं कैवल्यानन्दकन्दमवलम्बे ॥ २ ॥

चिन्तितफलपरिपोषणचिन्तामणिरेव कांचिनिलया मे ।
चिरतरसुचरितसुलभा चित्तं शिशिरयतु चित्सुधाधारा ॥

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

कुटिलकचं कठिनकुचं कुन्दस्मितकान्ति कुंकुमच्छायम् ।
कुरुते विहृतिं कांच्यां कुलपर्वतसार्वभौमसर्वस्वम् ॥ ४ ॥

पंचशरशास्त्रबोधन परमाचार्येण दृष्टिपातेन ।
कांचीसीम्नि कुमारी काचन मोहयति कामजेतारम् ॥ २

परया कांचीपुरया पर्वतपर्यायपीनकुचभरया ।
परतन्त्रा वयमनया पंकजसब्रह्मचारिलोचनया ॥ ६ ॥

ऐश्वर्यमिन्दुमौलेरैकात्म्यप्रकृति कांचिमध्यगतम् ।
ऐन्दवकिशोरशेखरमैदंपर्यं चकास्ति निगमानाम् ॥

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

श्रितकम्पासीमानं शिथिलितपरमशिवधैर्यमहिमानम् ।
कलये पाटलिमानं कंचन कंचुकितभुवनभूमानम् ॥८॥

आदृतकांचीनिलयामाद्यामारूढयौवनाटोपाम् ।
आगमवतंसकलिकामानन्दाद्वैतकन्दलीं वन्दे ॥ ९ ॥

तुंगाभिरामकुचभरशृंगारितमाश्रयामि कांचिगतम् ।
गंगाधरपरतन्त्रं शृंगाराद्वैततन्त्रसिद्धान्तम् ॥ १० ॥

कांचीरत्नविभूषां कामपि कंदर्पसूतिकापांगीम् ।
परमां कलामुपासे परशिववामांकपीठिकासीनाम् ॥

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

कंपातीरचराणां करुणाकोरकितदृष्टिपातानाम् ।
केलीवनं मनो मे केषांचिद्भवतु चिद्विलासानाम् ॥
आमूतरुमूलवसतेरादिमपुरुषस्य नयनपीयूषम् ।
आरब्धयौवनोत्सवमाम्नायरहस्यमन्तरवलम्बे ॥ १३ ॥
अधिकांचि परमयोगिभिरादिमपरपीठसीम्नि दृश्येन ।
अनुबद्धं मम मानसमरुणिमसर्वस्वसंप्रदायेन ॥ १४ ॥
अंकितशंकरदेहामंकुरितोरोजकंकणाश्लेषैः ।
अधिकांचि नित्यतरुणी मदाक्षं कांचिदद्भुतां बालाम् ॥

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

मधुरधनुषा महीधरजनुषा नन्दामि सुरभिबाणजुषा ।
चिद्वपुषा कांचिपुरे केलिजुषा बन्धुजीवकान्तिमुषा ॥

मधुरस्मितेन रमते मांसलकुचभारमन्दगमनेन ।
मध्येकांचि मनो मे मनसिजसाम्राज्यगर्वबीजेन ॥ १७ ॥

धरणिमयीं तरणिमयीं पवनमयीं गगनदहनहोतृमयीम् ।
अम्बुमयीमिन्दुमयीमम्बामनुकम्पमादिमामीक्षे ॥ १८ ॥

लीनस्थिति मुनिहृदये ध्यानस्तिमितं तपस्यदुपकम्पम् ।
पीनस्तनभरमीडे मीनध्वजतन्त्रपरमतात्पर्यम् ॥ १९ ॥

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

श्वेता मन्थरहसिते शाता मध्ये च वाङ्मनोऽतीता ।
शीता लोचनपाते स्फीता कुचसीम्नि शाश्वती माता ॥

पुरतः कदा नु करवै पुरवैरिविमर्दपुलकिताङ्गलताम् ।
पुनतीं काञ्चीदेशं पुष्पायुधवीर्यसरसपरिपाटीम् ॥ २१ ॥

पुण्या कापि पुरन्ध्री पुङ्खितकन्दर्पसंपदा वपुषा ।
पुलिनचरी कम्पायाः पुरमथनं पुलकनिचुलितं कुरुते ॥

तनिमाद्वैतवलग्नं तरुणारुणसंप्रदायतनुलेखम् ।
तटसीमनि कम्पायास्तरुणिमसर्वस्वमाद्यमद्राक्षम् ॥

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

पौष्टिककर्मविपाकं पौष्पशरं सविधसीम्नि कम्पायाः ।
अद्राक्षमात्तयौवनमभ्युदयं कंचिदर्धशशिमौलेः ॥ २४ ॥
संश्रितकांचीदेशे सरसिजदौर्भाग्यजाग्रदुत्तंसे ।
संविन्मये विलीये सारस्वतपुरुषकारसाम्राज्ये ॥ २५ ॥
मोदितमधुकरविशिखं स्वादिमसमुदायसारकोदण्डम् ।
आदृतकांचीखेलनमादिममारुण्यभेदमाकलये ॥ २६ ॥
उररीकृतकांचिपुरीमुपनिषदरविन्दकुहरमधुधाराम् ।
उन्नम्रस्तनकलशीमुत्सवलहरीमुपास्महे शंभोः ॥ २७ ॥

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

एणशिशुदीर्घलोचनमेनःपरिपन्थि संततं नमताम् ।
एकाम्रनाथजीवितमेवंपददूरमेकमवलम्बे ॥ २८ ॥

स्मयमानमुखं कांचीमयमानं कमपि देवताभेदम् ।
दयमानं वीक्ष्य मुहुर्वयमानन्दामृताम्बुधौ मग्नाः ॥२९॥

कुतुकजुषि कांचिदेशे कुमुदतपोराशिपाकशेखरिते ।
कुरुते जनो मनोऽयं कुलगिरिपरिबृढकुलैकमणिदीपे ॥

वीक्षेमहि कांचिपुरे विपुलस्तनकलशगरिमपरवशितम् ।
विद्रुमसहचरदेहं विभ्रमसमवायसारसंनाहम् ॥ ३१ ॥

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

कुरुविन्दगोत्रगात्रं कूलचरं कमपि नौमि कम्पायाः ।
कूलंकषकुचकुम्भं कुसुमायुधवीर्यसारसंरम्भम् ॥ ३२ ॥
कुड्मलितकुचकिशोरैः कुर्वाणैः कांचिदेशसौहार्दम् ।
कुंकुमशोणैर्निचितं कुशलपथं शंभुसुकृतसंभारैः ॥ ३३ ॥
अङ्कितकचेन केनचिदन्धंकरणौषधेन कमलानाम् ।
अन्तःपुरेण शंभोरलंक्रिया कापि कल्प्यते कांच्याम् ॥
उररीकरोमि संततमूष्मलफालेन लालितं पुंसा ।
उपकम्पमुचितखेलनमुर्वीधरवंशसंपदुन्मेषम् ॥ ३५ ॥

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

अंकुरितस्तनकोरकमंकालंकारमेकचूतपतेः ।
आलोकेमहि कोमलमागमसंलापसारयाथार्थ्यम् ॥ ३६ ॥

पुंजितकरुणमुदंचितशिंजितमणिकांचि किमपि कांचिपुरे
मंजरितमृदुलहासं पिंजरतनुरुचि पिनाकिमूलधनम् ॥

लोलहृदयोऽस्मि शंभोर्लोचनयुगलेन लेह्यमानायाम् ।
ललितपरमशिवायां लावण्यामृततरंगमालायाम् ॥ ३८ ॥

मधुकरसहचरचिकुरैर्मदनागमसमयदीक्षितकटाक्षैः ।
मण्डितकम्पातीरैर्मङ्गलकन्दैर्ममास्तु सारूप्यम् ॥ ३९ ॥

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

वदनारविन्दवक्षोवामांकतटीवशंवदीभूता ।
पुरुषत्रितये त्रेधा पुरंध्रिरूपा त्वमेव कामाक्षि ॥ ४० ॥

बाधाकरीं भवाब्धेराधाराद्यम्बुजेषु विचरन्तीम् ।
आधारीकृतकांचीं बोधामृतवीचिमेव विमृशामः ॥ ४१ ॥

कलयांयन्तः शशधरकलयांकितमौलिममलचिद्वलयाम् ।
अलयामागमपीठीनिलयां वलयांकसुन्दरीमंबाम् ॥ ४२ ॥

शर्वादिपरमसाधकगुर्वानीताय कामपीठजुषे ।
सर्वाकृतये शोणिमगर्वाय समर्प्यते हृदयम् ॥ ४३ ॥

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

समया सांध्यमयूखैः समया बुद्ध्या सदैव शीलितया ।
उमया कांचीरतया न मया लभ्येत किं तु तादात्म्यम् ॥

जन्तोस्तव पदपूजनसंतोषतरंगितस्य कामाक्षि ।
बन्धो यदि भवति पुनः सिन्धोरंभःसु बम्भ्रमीति शिला ॥

कुण्डलि कुमारि कुटिले चण्डि चराचरसवित्रि चामुण्डे ।
गुणिनि गुहारिणि गुह्ये गुरुमूर्ते त्वां नमामि कामाक्षि ॥

अभिदाकृतिर्भिदाकृतिरचिदाकृतिरपि चिदाकृतिर्मातः ।
अनहन्ता त्वमहन्ता भ्रमयसि कामाक्षि शाश्वती विश्वम् ॥

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

शिव शिव पश्यन्ति समं श्रीकामाक्षीकटाक्षिताः पुरुषाः ।
विपिनं भवनममित्रं मित्रं लोष्ठं च युवतिबिंबोष्ठम् ॥

कामपरिपन्थिकामिनि कामेश्वरि कामपीठमध्यगते ।
कामदुघा भव कमले कामकले कामकोटि कामाक्षि ॥

मध्येहृदयं मध्येनिटिलं मध्येशिरोऽपि वास्तव्याम् ।
चण्डकरशक्रकार्मुकचन्द्रसमाभां नमामि कामाक्षीम् ॥

अधिकांचि केलिलोलैरखिलागमयन्त्रतन्त्रमन्त्रमयैः ।
अतिशीतं मम हृदयं विषमशरद्रोहिजीवनोपायैः ॥

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

नन्दति मम हृदि काचन मन्दिरयन्ती निरन्तरं कांचीम् ।
इन्दुरविमण्डलकुचा बिन्दुवियन्नादपरिणता तरुणी ॥
शम्पालतासवर्णं संपादयितुं भवज्वरचिकित्साम् ।
लिम्पामि मनसि किंचन कम्पातटरोहि सिद्धभैषज्यम् ॥
अनुमितकुचकाठिन्यामधिवक्षःपीठमंगजन्मरिपोः ।
आनन्ददां भजे तामानंगब्रह्मतत्त्वबोधिसिराम् ॥ ५४ ॥
ऐक्षिषि पाशाङ्कुशधरहस्तान्तं विस्मयार्हवृत्तान्तम् ।
अधिकांचि निगमवाचां सिद्धान्तं शूलपाणिशुद्धान्तम् ॥

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

आहितविलासभंगीमाब्रह्मस्तम्बशिल्पकल्पनया ।
आश्रितकांचीमतुलामाद्यां विस्फूर्तिमाद्रिये विद्याम् ॥
मूकोऽपि जटिलदुर्गतिशोकोऽपि स्मरति यः क्षणं भवतीम् ।
एको भवति स जन्तुर्लोकोत्तरकीर्तिरेव कामाक्षि ॥
पंचदशवर्णरूपं कंचन कांचीविहारधौरेयम् ।
पंचशरीयं शंभोर्वंचनवैदग्ध्यमूलमवलम्बे ॥ ५८ ॥
परिणतवतीं चतुर्धा पदवीं सुधियां समेत्य सौषुम्नीम् ।
पंचाशदर्णकल्पित पदशिल्पां तां नमामि कामाक्षीम् ॥

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

आदिक्षन्मम गुरुराडादिक्षान्ताक्षरात्मिकां विद्याम् ।
स्वादिष्ठचापदण्डां नेदिष्ठामेव कामपीठगताम् ॥

तुष्यामि हर्षितस्मरशासनया कांचिपुरि कृतासनया ।
स्वासनया सकलजगद्भासनया कलितशम्बरासनया ॥

प्रेमवती कम्पायां स्थेमवती यतिमनःसु भूमवती ।
सामवती नित्यगिरा सोमवती शिरसि भाति हैमवती ॥

कौतुकिना कम्पायां कौसुमचापेन कीलितेनान्तः ।
कुलदैवतेन महता कुड्मलमुद्रां धुनोतु नः प्रतिभा ॥

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

केनापि मिलितदेहा यूना स्वाहासहायतिलकेन ।
सहकारमूलदेशे संविद्रूपा कुटुम्बिनी रमते ॥ ६४ ॥

कुसुमशरगर्वसंपत्कोशगृहं भाति कांचिमध्यगतम् ।
स्थापितमस्मिन्कथमपि गोपितमन्तर्मया मनोरत्नम् ॥

दग्धषडध्वारण्यं दरदलितकुसुम्भसंभृतारुण्यम् ।
कलये नवतारुण्यं कम्पातटसीम्नि किमपि कारुण्यम् ॥

अधिकांचि वर्धमानामतुलां करवाणि पारणामक्ष्णोः ।
आनन्दपाकभेदामरुणिमपरिणामगर्वपल्लविताम् ॥

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

बाणसृणिपाशकार्मुकपाणिममुं कमपि कामपीठगतम् ।
एणधरकोणचूडं शोणिमपरिपाकभेदमाकलये ॥ ६८ ॥
किं वा फलति ममान्यैर्बिम्बाधरचुम्बिमन्दहासमुखी ।
संबाधकरी तमसामम्बा जागर्ति मनसि कामाक्षी ॥
मंचे सदाशिवमये परशिवमयललितपौषपर्यङ्के ।
अधिचक्रमध्यमास्ते कामाक्षीनाम किमपि मम भाग्यम् ॥
रक्ष्योऽस्मि कामपीठीलासिकया घनकृपाम्बुराशिकया ।
श्रुतियुवतिकुन्तलीमणिमालिकया तुहिनशैलबालिकया ॥

Sri Vedachalam Sastri Collection, Kanadukudi

CC0. In Public Domain. Muthulakshmi Research Academy

लीये पुरहरजाये माये तव तरुणपल्लवच्छाये ।
चरणे चन्द्राभरणे कांचीशरणे नतार्तिसंहरणे ॥ ७२ ॥
मूर्तिमति मुक्तिबीजे मूर्ध्नि स्तबकितचकोरसाम्राज्ये ।
मोदितकम्पाकूले मुहुर्मुहुर्मनसि मुमुदिषास्माकम् ॥
वेदमयीं नादमयीं बिन्दुमयीं परपदोद्यदिन्दुमयीम् ।
मन्त्रमयीं तन्त्रमयीं प्रकृतिमयीं नौमि विश्वविकृतिमयीम्
पुरमथनपुण्यकोटी पुंजितकविलोकसूक्तिरसधाटी ।
मनसि मम कामकोटी विहरतु करुणाविपाकपरिपाटी ॥

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

कुटिलं चटुलं पृथुलं मृदुलं कचनयनजघनचरणेषु ।
अवलोकितमवलम्बितमधिकम्पातटममेयमस्माभिः ॥
प्रत्यङ्मुख्या दृष्ट्या प्रसाददीपाङ्कुरेण कामाक्ष्याः ।
पश्यामि निस्तुलमहो पचेलिमं किमपि परशिवोल्लासम् ॥
विद्ये विधातृविषये कात्यायनि कालि कामकोटि कले । २०
भारति भैरवि भद्रे शाकिनि शांभवि शिवे स्तुवे भवतीम्
मालिनि महेशचारिणि कांचीखेलिनि विपक्षकालिनि ते ।
शूलिनि विद्रुमशालिनि सुरजनपालिनि कपालिनि
नमोऽस्तु ॥ ७९ ॥

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

देशिक इति किं शङ्के तत्तादृक्तव नु तरुणिमोन्मेषः ।
कामाक्षि शूलपाणेः कामागमतन्त्रयज्ञदीक्षायाम् ॥८०॥

वैतण्डकुम्भडम्बरवैतण्डिककुचभरार्तमध्याय ।
कुङ्कुमरुचे नमस्यां शंकरनयनामृताय रचयामः ॥

अधिकांचितमणिकांचनकांचीमधिकांचि कांचिदद्राक्षम् ।
अवनतजनानुकम्पामनुकम्पाकूलमस्मदनुकूलाम् ॥

परिचितकम्पातीरं पर्वतराजन्यसुकृतसंनाहम् ।
परगुरुकृपया वीक्षे परमशिवोत्सङ्गमंगलाभरणम् ॥

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

दग्धमदनस्य शंभोः प्रथीयसीं ब्रह्मचर्यवैदग्धीम् ।
तव देवि तरुणिमश्रीचतुरिमपाको न चक्षमे मातः ॥

मदजलतमालपत्रा वसनितपत्रा करादृतखनित्रा ।
विहरति पुलिन्दयोषा गुंजाभूषा फणीन्द्रकृतवेषा ॥

अङ्के शुकिनी गीते कौतुकिनी परिसरे च गायकिनी ।
जयसि सविधेऽम्ब भैरवमण्डलिनी श्रवसि शंखकुण्डलिनी

प्रणतजनतापवर्गा कृतरणसर्गा ससिंहसंसर्गा ।
कामाक्षि मुदितभर्गा हतरिपुवर्गा त्वमेव सा दुर्गा ॥

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

श्रवणचलद्वेतण्डा समरोद्दण्डा धुतासुरशिखण्डा ।
देवि कलितान्त्रषण्डा धृतनरमुण्डा त्वमेव चामुण्डा ॥

उर्वीधरेन्द्रकन्ये दर्वीभरितेन भक्तपूरेण ।
गुर्वीमकिंचनार्तिं खर्वीकुरुषे त्वमेव कामाक्षि ॥

ताडितरिपुपरिपीडनभयहरणनिपुणहलमुसला ।
क्रोडपतिभीषणमुखी क्रीडसि जगति त्वमेव कामाक्षि ॥

स्मरमथनवरणलोला मन्मथहेलाविलासमणिशाला ।
कनकरुचिचौर्यशीला त्वमम्ब बाला कराब्जधृतमाला ॥

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

विमलपटी कमलकुटी पुस्तकरुद्राक्षशस्तहस्तपुटी ।
कामाक्षि पक्ष्मलाक्षी कलितविपंची विभासि वैरिंची ॥

कुंकुमरुचिपिंगमसृक्पङ्किलमुण्डालिमण्डितं मातः ।
जयति तव रूपधेयं जपपटपुस्तकवराभयाब्जकरम् ॥ 24

कनकमणिकलितभूषां कालायसकलहशीलकान्तिकलाम्
कामाक्षि शीलये त्वां कपालशूलाभिरामकरकमलाम् ॥

लोहितिमपुंजमध्ये मोहितभुवनं मुदा निरीक्षन्ते ।
वदनं तव कचयुगलं कांचीसीमां च केऽपि कामाक्षि ॥

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

जलधिद्विगुणितहुतवहदशदिनेश्वरकलाशिवनेयदलैः ।
नलिनैर्महेशि गच्छसि सर्वोत्तरकरकमलदलममलम् ॥
सत्कृतदेशिकचरणाः सबीजनिर्बीजयोगनिश्रेण्या ।
अपवर्गसौधवलभीमारोहन्त्यम्ब केऽपि तव कृपया ॥
अन्तरपि बहिरपि त्वं जन्तुततेरन्तकान्तकृदहंते ।
चिन्तितसन्तानवतां संततमपि तन्तनीषि महिमानम् ॥
कलमंजुलवागनुमितगलपंजरशुकग्रहौत्कण्ठ्यात् ।
अम्ब रदनाम्बरं ते बिम्बफलं शम्बरारिणा न्यस्तम् ॥

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

विमलपटी कमलकुटी पुस्तकरुद्राक्षशस्तहस्तपुटी ।
कामाक्षि पक्ष्मलाक्षी कलितविपंची विभासि वैरिंची ॥
कुंकुमरुचिपिंगमसृक्पङ्किलमुण्डालिमण्डितं मातः ।
जयति तव रूपधेयं जपपटपुस्तकवराभयाब्जकरम् ॥
कनकमणिकलितभूषां कालायसकलहशीलकान्तिकलाम्
कामाक्षि शीलये त्वां कपालशूलाभिरामकरकमलाम् ॥
लोहितिमपुंजमध्ये मोहितभुवनं मुदा निरीक्षन्ते ।
वदनं तव कुचयुगलं कांचीसीमां च केऽपि कामाक्षि ॥

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

जलधिद्विगुणितहुतवहदिशादिनेश्वरकलाश्विनेयदलैः ।
नलिनैर्महेशि गच्छसि सर्वोत्तरकरकमलदलममलम् ॥

सत्कृतदेशिकचरणाः सबीजनिर्बीजयोगनिश्रेण्या ।
अपवर्गसौधवलभीमारोहन्त्यम्ब केऽपि तव कृपया ॥

अन्तरपि बहिरपि त्वं जन्तुततेरन्तकान्तकृदहंते ।
चिन्तितसन्तानवतां संततमपि तन्तनीषि महिमानम् ॥

कलमंजुलवागनुमितगलपंजरशुकग्रहौत्कण्ठ्यात् ।
अम्ब रदनाम्बरं ते बिम्बफलं शम्बरारिणा न्यस्तम् ॥

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

जय जय जगदम्ब शिवे जय जय कामाक्षि जय जयाद्रिसुते
जय जय महेशदयिते जय जय चिद्गगनकौमुदीधारे ॥

आर्याशतकं भक्त्या पठतामार्याकटाक्षेण ।
निःसरति वदनकमलाद्वाणी पीयूषधोरणी दिव्या ॥

इति आर्याशतकं संपूर्णम् ॥

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

Sri Vedachalam Sastri Collection, Karaikudi

CC0. In Public Domain. Muthulakshmi Research Academy

Sri Vedachalam Sastri Collection, Karaikudi